१२

245sk12

॥शुनःशेपोपाख्यानम्-१॥

प्रस्तावना

भारतीयसंस्कृतेः मूलं वेदाः भवन्ति। चत्वारः वेदाः विद्यन्ते। ते च ऋग्वेदः, यजुर्वेदः, सामवेदः, अर्थववेदश्चेति। तत्र अपि चतर्षु वेदेषु ऋग्वेदः अत्यन्तं लोकप्रसिद्धः वर्तते। पुनश्च सम्पूर्णः ऋग्वेदः गद्यमयः विद्यते। पुनश्च ऋग्वेदादिषु विद्यमानानि उपाख्यानानि ऋग्वेदस्य माहात्म्यम् अधिकतया वर्धयन्ति।

शुनःशोपोपाख्यानम् ऋग्वेदस्य अत्यन्तं प्रसिद्धम् आख्यानं विलसति। शुनःशोपोपाख्यानम् ऋग्वेदस्य अनेकेषु सूक्तेषु विद्यते (१/२४-२५)। तेन इयं घटना सत्याश्रिता आसीत् इति प्रतीयते। ऐतरेयब्राह्मणे (७/३) इदमाख्यानमतिविस्तरेण सह वर्णितम् अस्ति। अस्य उपाख्यानस्य आदौ हरिश्चन्द्रस्य अन्ते विश्वामित्रस्य च सम्बन्धं परिकल्प्य परिवर्धितं कृतमस्ति।वरुणस्य कृपातः ऐक्ष्वाकु-नृप-हरिश्चन्द्रस्य गृहे पुत्रोत्पन्नमभवत्। समर्पणसमये अरण्ये तस्य पलायनम्, हरिश्चन्द्रमुदरजन्यरोगोत्पत्तौ, मार्गे अजीगर्तस्य मध्यमपुत्रशुनःशेपस्य क्रयणम्, देवतायाः कृपातस्तस्य वध्यपशत्वात् मुक्तिः विश्वामित्रद्वारेण तं कृतक-पुत्रकरणादीनां घटनायाराख्यानम् अतिप्रसिद्धमस्ति।

अति बृहत् इदम् उपाख्यानम्। अतः यद्यपि एक एव विषयः अनुवर्तते तथापि उपाख्यानस्य त्रेधा भागान् प्रकल्प्य पाठत्रयं रचितम् अस्ति। त्रिषु पाठेषु समग्रम् उपाख्यानमस्ति इति अवधेयम्।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- शुनःशेपोपाख्यानं ज्ञातुं शक्नुयात्।
- शुनःशेपोपाख्यानस्य तात्पर्यं ज्ञातुं शक्नुयात्।
- वैदिकप्रयोगान् ज्ञातुं शक्नुयात्।
- वैदिकलौकिकयोः प्रयोगयोः भेदं ज्ञातुं शक्नुयात्।
- स्वयमेव मन्त्रस्य व्याख्यानं कर्तुं समर्थो भवेत्।
- स्वयमेव श्लोकस्य अन्वयं कर्तुं योग्यो भवेत्।
- सूक्ते स्थितं व्याकरणं ज्ञातुं शक्नुयात्।
- मन्त्रस्य सामान्यार्थम् ज्ञातुं प्रभवेत्।

प्रथमखण्डः

१२.१) इदानीम् मूलपाठम् पठाम

हरिश्चन्द्रः ह वैधन ऐक्ष्वाको राजाऽपुत्र आस तस्य ह शतं जाया बभूवुः तासु पुत्रं न लेभे तस्य ह पर्वतनारदौ गृहे ऊषतुः स ह नारदं पप्रच्छ इति।

यं न्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न। किं स्वित् पुत्रेण विन्दते तन्म आचक्ष नारदेति॥ इति।

स एकया पृष्टो दशभिः प्रत्युवाच इति।

ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेजीवतो मुखम्॥ इति।

यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि। यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः॥ इति।

शश्वत् पुत्रेण पितरोऽत्यायन् वहुलं तमः। आत्मा हि जज्ञे आत्मनः स इरावत्यतितारिणी॥ इति।

किं नु मलं किमजिनं किमु श्मश्रुणि किं तपः। पुत्रं ब्रह्माण इच्छध्वं स वै लोकेऽवदावदः॥ इति।

अन्नं ह प्राण शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः। सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः व्योमन्॥ इति।

पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।

तस्यां पुनर्नवे भूत्वा दशमे मासि जायते॥ इति।

तज्ज्या जाया भवति यदस्यां जायते पुनः। आभूतिरेषा भूतिर्वीजमेतन्नधीयते॥ इति।

देवाश्चैतामृषयश्च तेजः समभरन्महत्। देवा मनुष्यानब्रूवन्नेषा वो जननी पुनः॥ इति।

नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः। तस्मात् पुत्रो मातरं स्वसारं चाधरोहति॥ इति।

एष पन्था उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः। तं पश्यन्ति पशवो, वयांसि च तस्मात्ते मात्राऽपि मिथुनी भवन्ति। इति हास्मा आख्याय॥

द्वितीयखण्डः

अथैनमुवाच वरुणं राचानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति।

तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति तथेति तस्य पुत्रो जज्ञे रोहितो नाम इति।

तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति तथेति इति।

स ह निर्दश आस तं होवाच निर्दशो न्वभूद्यजस्व माऽनेनेति स होवाच यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य जायन्तामथ त्वा यजा इति तथेति इति।

तस्य ह दन्ता जज्ञिरे तं होवाचाज्ञत वा अस्य दन्ता यजस्व माऽनेनेति स होवाच या वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति तथेति।

तस्य ह दन्ता पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व माऽनेनेति स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्ते

अथ न मेध्यो भवति दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति तथेति।

तस्य ह दन्ताः पुनर्जज्ञिरे तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व माऽनेनेति स होवाच यदा वै क्षत्रियः सांनाहुको भवत्यथ मेध्यो भवति संनाहं नु प्राप्नोत्वथ त्वा यजा इति तथेति।

स ह संनाहं प्रापत्तं होवाच संनाहं नु प्राप्नोद्यजस्व माऽनेनेति स तथेत्युक्त्वा पुत्रमामन्त्रयामास ततायं वै मह्यं त्वामददाद्धन्त त्वयाऽहमिमं यजा इति।

स ह नेत्युक्त्वा धनुरायारण्यमुपातस्थौ स संवत्सरमरण्ये चचार।

प्रथमखण्डः

१२.१.१) इदानीं मूलपाठम् अवगच्छाम -

हरिश्चन्द्रः ह वैधस ऐक्ष्वाको राजाऽपुत्र आस तस्य ह शतं जाया वभूवुः तासु पुत्रं न लेभे तस्य ह पर्वतनारदौ गृह ऊषतुः स ह नारदं पप्रच्छ इति।

व्याख्या- हरिश्चन्द्रो नाम राजर्षिः प्रस्कण्वहरिश्चन्द्रावृषी इति पाणिनिना सूत्रितत्वात्। स च वेधसो नृपतेः पुत्र इक्ष्वाकुवंशोद्भवो राजा पुत्रहीन आस। स च शतसंख्यानां जायानां मध्ये कस्यांचिदपि जायायां पुत्रं न लेभे। तस्य राज्ञो गृहे पर्वतनारदनामानौ यावृषी तौ निवासं चक्रतुः। तयोर्मध्ये नारदमृषिमेतयो गाथया राजा पप्रच्छ।

सरलार्थः- ईक्ष्वाकुवंशीयः वेधसः पुत्रः राजा हरिश्चन्द्रः अपुत्रः असीत्। तस्य शतं पत्न्यः आसन्। परन्तु ताभिः पुत्रलाभः न जातः। तस्य गृहे पर्वतनारदौ नाम द्वौ ऋषी आस्ताम्। स (हरिश्चन्द्रः) तयोः ऋषयोः नारदं पृष्टवान्।

व्याकरणम्-

- आस- अस्-धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- गाथया- गाथा सर्वैः गातुं योग्या गीतिः। तया इति।

यं न्विमं पुत्रमिच्छन्ति ये विजानन्ति ये च न। किं स्वित् पुत्रेण विन्दते तन्म आचक्ष नारदेति॥ इति।

व्याख्या- ये देवमनुष्यादयो विजानन्ति विवेकज्ञानयुक्ताः। ये च पश्वादयो न विजानन्ति विवेकज्ञानरहिताः। ते सर्वेऽपि नु क्षिप्रं यमिमं पुत्रमिच्छन्ति तेन पुत्रेण किं स्वित् विन्दते किं नाम फलं पित्रा लभते हे नारद मे मह्यं तत्फलमाचक्षेति राज्ञः प्रश्नः।

सरलार्थः- ये ज्ञानिनः ये च अज्ञाः ते सर्वैरेव पुत्रः इष्टः, तेन पुत्रेण ते किं लभन्ते इति मां कथयतु।

व्याकरणम्-

- विजानन्ति -वि इत्युपसर्गपूर्वकात् ज्ञा-धातोः लट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- विदन्ते- विद्-धातोः लट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।

स एकया पृष्टो दशभिः प्रत्युवाच इति।

व्याख्या- स नारद एकया गाथया पृष्टः सन् दशभिर्गाथाभिः प्रत्युत्तरमुक्तवान्।

सरलार्थः- स (नारदः) एकया गाथया पृष्टः दशभिः गाथाभिः उत्तरं दत्तवान्।

व्याकरणम्-

- पृष्टः - प्रच्छ-धातोः तप्रत्ययान्तं रूपम्।
- उवाच- वच्-धातोः लिट-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेजीवतो मुखम्॥ इति।

व्याख्या- उत्पन्नस्य सुखस्य जीवतः पुत्रस्य मुखं पिता यदि पश्येतदानीमस्मिन् पुत्रे स्वकीयमृणं लौकिकं वैदिकं च संनयति। सम्यगवस्थापयति। लौकिकस्य अवस्थापनात् पुत्रपौत्रादिभिः ऋणं प्रत्यर्पणीयमिति स्मृतकारा आहुः। वैदिकं त्रिभिः ऋणवा जायत इत्यादि श्रुत्युक्तं पूर्वमेवोदाहृतम्। तस्य च पुत्रावस्थापनं संपत्तिनामकेन कर्मणा सम्पद्यते। तच्च कर्म वाजसनेयिभिः आम्नातम्। -'अथातः संपत्तिर्यदा प्रैष्यन् मन्यते अथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति। स पुत्रः प्रत्याहाहं यज्ञोहं लोक इति। ब्रह्म मया कर्तव्यं वेदाध्ययनं मया अनुष्ठेया यज्ञाश्च मया संपाद्य उत्तमा लोकाश्चेत्येतत् सर्वं पुत्रेण त्वयैव संपादनीयमिति पितृवाक्यस्यार्थः। सर्वमहं संपादयिष्यामीति पुत्रवाक्यस्यार्थः॥

अत्राप्यारण्यककाण्डे संक्षिप्य संदर्शयिष्यते- सोस्यायमात्मा पुणेभ्यः कर्मभ्यः प्रतिधीयते इति। एवमृणं पुत्रे समर्पयति। तथैवामृतत्वं मरणरहितं मुक्तिपदं च गच्छति। पुत्रार्पितलौकिकवैदिकभारस्याविघ्नेन तत्त्वज्ञानसंपादनात्।

सरलार्थः- पिता यदि उत्पन्नस्य किञ्च जीवितस्य पुत्रस्य मुखदर्शनं कुर्यात् तर्हि पुत्राय समस्तं वैदिकं लौकिकं च ऋणं प्रदाय अमृतत्वं लभते।

व्याकरणम्-

- गच्छति- गम्धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- पश्येत्- दृश्-धातोः विधिलिङ्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि। यावन्तो अप्सु प्राणिनां भूयान् पुत्रे पितुस्ततः॥ इति।

व्याख्या- पृथिव्यां भोगाः सस्यनिवासादयः। जातवेदस्याग्नौ भोगा दहनपचनादयः। अप्सु भोगाः स्नानपानादयः। प्राणिनामेते सर्वे भोगा यावन्तः सन्ति ततस्तावद्भ्यः सर्वेभ्यो भोगेभ्यो भूयानभ्यधिकः पितुः पुत्रे भोगो विद्यते। अत्यन्तसुखहेतुत्वात्। तथा चाहुः- पुत्रोत्पत्तिविपत्तिभ्यां नापरं सुखदुःखयोः इति।

सरलार्थः- पृथिव्यां प्राणिगणेषु यः भोगः उपलभ्यमानः, अग्नौ जले च यः भोगः उपलभ्यमानः, पितुः कृते सर्वाधिकः भोगः पुत्रे एव विराजमानः अस्ति।

व्याकरणम्-

- भोगाः - भोग इति पुंलिङ्गस्य अकारान्तप्रातिपदिकस्य प्रथमायाः बहुवचने रूपम्।भोगाः इत्युक्ते भोग्यविषयसमूहः।
- अप्सु- अप् इति स्त्रीलिङ्गस्य नित्यं बहुवचनान्तस्य प्रातिपदिकस्य सप्तम्याः बहुवचने रूपम्।

शश्वत् पुत्रेण पितरोऽत्यायन् वहुलं तमः। आत्मा हि जज्ञे आत्मनः स इरावत्यतितारिणी॥ इति।

व्याख्या- पितरो जनका उत्पन्नेन पुत्रेण शश्वत् सर्वदा लोकद्वयेपि बहुलमभ्यधिकं तम् ऐहिकमामुष्मिकं च दुःखमत्यायन्नतिक्रामन्ति। तथा वौधायन आह- पुदिति नरकस्याख्या दुःखं च नरकं विदुः। पुत्तस्तारणात्ततः पुत्रमिहेच्छन्ति परत्र च। इति। किं च हि यस्मात् कारणात् पितुः पुत्र उत्पन्न इत्युक्ते सति पिता स्वस्मात् स्वयमेव यज्ञ उत्पन्न इत्युक्तं भवति। ततः पिता यथा स्वयं स्वकीयं दुःखं विनाशयेत् तथा पुत्रोप्येतद्दुःखं विनाशयतीति द्रष्टव्यम्। तस्मात् स पुत्र इरावत्यन्नयुक्तातितारिणी नदीसमुद्रादेरतितरणहेतुर्नौरिति शेषः। यथा नोर्दुर्घटं नद्यादिकं तारयत्येवं पुत्रोप्यैहिकमामुष्मिकं च दुःखं तारयतीत्यर्थः।

सरलार्थः- पिता सर्वदा (इहलोके परलोके च) पुत्रस्य साहाय्यार्थं बहुदुःखम् अतिक्रामति। यतः आत्मरूपस्य पितुः समीपे आत्मा एव पुत्ररूपेण जायते। अतः एव पुत्रः पितुः समीपे दुःखार्णवस्य अतिक्रमणं कर्तुं योग्यः अन्नयुक्तः उत्कृष्टः नौकातुल्यः।

व्याकरणम्-

- जज्ञे- जनी(प्रादुर्भावे) इत्यस्मात् लिट्-लकारस्य धातोः प्रथमपुरुषस्य एकवचने रूपम्।
- आत्मा- आत्मन् इति नकारान्तप्रातिपदिकस्य प्रथमायाः एकवचने रूपम्।

किं नु मलं किमजिनं किमु श्मश्रुणि किं तपः। पुत्रं ब्रह्माण इच्छध्वं स वै लोकेऽवदावदः॥ इति।

व्याख्या- अत्र मलाजिनश्मश्रुतपः शब्दैराश्रमचतुष्टयं विवक्षितम्। मलरूपाभ्यां शुक्लशोणिताभ्यां संयोगान्मलशब्देन गार्हस्थ्यं विवक्षितम्। कृष्णाजिनसंयोगादजिनशब्देन ब्रह्मचर्यं विवक्षितम्। क्षौरकर्मराहित्याच्छाश्रशब्देन वानप्रस्थं विवक्षितम्। मलं गार्हपत्यं किं नु किं नाम सुखं करिष्यति न किञ्चिदत्यर्थः। एवमुत्तरत्रापि योज्यम्। हे ब्रह्माणो विप्रा विप्रक्षत्रियाद्याः सर्वे यूयं सुखहेतुत्वात् पुत्रमिच्छध्वम्। स वै एव पुत्रोवदावदो लोकः। वदितुमयोग्यानि निन्दावाक्यान्यवदास्तैर्वाक्यैर्नोद्यन्ते न कथ्यन्ते इत्यवदावदः। अवदावदो दोषराहित्यान्निन्दानर्ह इत्यर्थः। तादृशो लोको भोगहेतुः पुत्रः। तस्मादाश्रमेभ्योप्याधिक्येन पुत्रेच्छा कर्तव्या यद्यपि हरिश्चन्द्रः एवात्र प्रष्टा तथापि तेन सह ऋषीणां बहूणां सभायामवस्थानाद् ब्रह्माण इति सम्बोधनम्।

सरलार्थः- गार्हस्थ्येन ब्रह्मचर्येण वानप्रस्थेन पारिव्राज्येन किं भवेत्। हे विप्रगणाः, यूयं पुत्रं कामयत, पुत्रः एव आनन्दनीयः।

व्याकरणम्-

- इच्छध्वम्- इष्-धातोः मध्यमपुरुषस्य बहुवचने वैदिकं रूपम्।
- अवदावदः - वदितुम् अयोग्यानि निन्दावाक्यानि अवदाः। तैः वाक्यैः न उद्यते न कथ्यते इति अवदावदः।

अन्नं ह प्राण शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः। सखा ह जाया कृपणं ह दुहिता ज्योतिर्ह पुत्रः व्योमन्॥ इति।

व्याख्या- अन्नादयो लोके सुखहेतुत्वेन प्रसिद्धाः। यथा हि शरीरे प्राणावस्थितिहेतुत्वादन्नमेव प्राणः। वासः शीतोपद्रवाद्रक्षकत्वेन शरणं गृहसमानम्। हिरण्यं कर्णाभरणादिकं दृष्टिप्रियत्वाद्रूपसंपादकम्। पशवो गवाश्वादयो विवाहविशेषेण निर्वाहकाः। जाया भोगे सहकारित्वात् सखा ह सखिस्वरूपैव। एवमेते सुखहेतुत्वेन प्रसिद्धा अपि तात्कालिकमल्पमेव सुखं प्रयच्छन्ति। दुहिता ह पुत्रीति कृपणं केवलदुःखकारित्वाद्दैन्यहेतुः। तथा च स्मर्यते-

संभवे स्वजनदुःखकारिका संप्रदानसमयेऽऽर्थहारिका।

यौवनेऽपि बहुदोषकारिका दारिका हृदयदारिका पितुः। इति।

पुत्रो ह पुत्रस्तु ज्योतिःस्वरूपं तमोनिवारकत्वेन स हि पितरं परमे व्योमन्नुत्कृष्ट आकाशे परब्रह्मस्वरूपेऽवस्थापयति। आकाशस्तल्लिङ्गादित्यनेन पूर्वमेवामृतत्वं च गच्छतीत्यत्र प्रतिपादितम्।

सरलार्थः- अन्नमेव प्राणः (प्राणधारणस्य सहायकः), वस्त्रमेव शरणं (आश्रयः), हिरण्यमेव रूपं (रूपोत्पादकः), विवाहः एव पशुलाभस्य उपायः। जाया पत्नी वा सखिस्वरूपा, दुहिता दुःखस्य हेतुः, परन्तु पुत्र एव उत्कृष्टः ऊर्ध्वलोके ज्योतिःस्वरूपः।

व्याकरणम्-

- सखा- सखिन् इति प्रातिपदिकस्य प्रथमायाः एकवचने रूपम्।
- दुहिता- दुहितृ इति प्रातिपदिकस्य प्रथमायाः एकवचने रूपम्।

पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।

तस्यां पुनर्नवे भूत्वा दशमे मासि जायते॥ इति।

व्याख्या- पत्युराकारद्वयमस्ति। वर्तमानपुरुषाकार एको रेतोरूपेण गर्भाकारो द्वितीयः। जायाया अपि आकारद्वयमस्ति। पतिरूपमाकारं प्रति जाया भवति। गर्भरूपमाकारं प्रति माता भवति। अतः स तादृशः पतिः स्वयं रेतोरूपेण गर्भो भूत्वा पूर्वमवस्थितां जायां भविष्यदाकारेण मातरं सतीं प्रविशति। तस्यां मातरि पुनर्नवो भूत्वा पूर्वमन्यस्यां मातर्युत्पन्नो जरठः। इदानीं पुनर्नूतनवालो भूत्वा तस्यामिदानीन्तन्यामस्यां मातरि गर्भपाके सति दशमे मास्युत्पद्यन्ते तस्मात् पुत्रः स्वस्मादन्यो न भवति।

सरलार्थः- पतिः (रेतोरूपेण) जायां प्रविशति, गर्भरूपेण स एव (भविष्यत्काले विद्यमानां) मातरं प्रविशति। स एव पुनः दशमासाभ्यन्तरे उत्पन्नः भवति।

व्याकरणम्-

- प्रविशति- प्र इत्युपसर्गपूर्वकात् विश्(प्रवेशने) इत्यर्थकात् धातोः प्रथमपुरुषस्य एकवचने रूपम्।
- भूत्वा- भू- (सत्तायाम्) इत्यर्थकात् धातोः क्त्वाप्रत्ययान्तं रूपम्।
- जायते- जनी(प्रादुर्भावे) इत्यस्मात् धातोः प्रथमपुरुषस्य एकवचने रूपम्।

तज्ज्या जाया भवति यदस्यां जायते पुनः। आभूतिरेषा

भूतिर्वीजमेतन्नधीयते॥ इति।

व्याख्या- यद्यस्मात्कारणादस्यां गर्भधारिण्यामयं पिता पुत्ररूपेण पुनर्जायते तत्तस्मात्कारणाल्लोकप्रसिद्धा या जायाऽस्ति सा जायतेऽस्यामिति व्युत्पत्त्या जायाशब्दवाच्या भवति। किं चैषा भूत्याभूतशब्दाभ्यामभिधीयते। भवत्यस्यां पुत्ररूपेण पतिरित्येषा भूतशब्दवाच्या रेतोरूपेणऽऽगत्यास्यां

पुत्ररूपेण भवतीत्याभूतिशब्दवाच्या। एतदेतस्यां स्त्रियां बीजं रेतोरूपं निधीयते प्रक्षिप्यत् तस्मादुक्ताः शब्दा उपपद्यन्ते।

सरलार्थः- पतिः पत्नीमध्ये (पुत्ररूपेण) पुनः जायते, तस्मात् पत्नी जाया (जाया इति आख्यां लभते) भवति। सा एव भूतिः आभूतिः इति शब्दद्वयवाच्या भवति, एतस्यामेव बीजं स्थापितं भवति।

व्याकरणम्-

- जायते- जनी(प्रादुर्भावे) इत्यस्मात् धातोः प्रथमपुरुषस्य एकवचने रूपम्।
- भवति- भू(सत्तायाम्) इत्यर्थकात् धातोः प्रथमपुरुषस्य एकवचने रूपम्।

देवाश्चैतामृषयश्च तेजः समभरन्महत्। देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः॥ इति।

व्याख्या- एतामेतस्यां योषिति देवाश्च महर्षयश्च स्वकीयं महत्तेजो रेतोरूपं सारं समभरन् पुत्रोत्पादनाय संपादितवन्तः। स्वयमेव संपाद्य ततो मनुष्यानित्यब्रूवन्। हे मनुष्या जायारूपेण वर्तते सेयं युष्माकं पुत्ररूपे जन्मनि जननी भवति।

सरलार्थः- देवाः मनुष्याः च एतस्मिन् (पत्नीगर्भे) महातेजसः स्थापनं चक्रुः, देवाः मनुष्यान् प्रति उक्तवन्तः- हे मनुष्याः एषा पुनः युष्माकं जननी भविष्यति।

व्याकरणम्-

- अब्रूवन्- ब्रूञ्-धातोः लङ्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।

नापुत्रस्य लोकोऽस्तीति तत्सर्वे पशवो विदुः। तस्मात् पुत्रो मातरं स्वसारं चाधरोहति॥ इति।

व्याख्या- लोको लोकजन्यं सुखपुत्रस्य नास्ति। नहि पुत्रदर्शनेन यत्सुखं तदन्यदर्शनेन क्वचिदपि दृश्यते इति यदस्ति तत्सर्वे गोमहिष्यादयो जानन्ति यस्मात्तस्मादेव कारणात् पशुजातौ जातः पुत्रो वत्सः स्वकीयां मातरं भगिनीं वा पुत्रोत्पादनार्थमधिरोहति।

सरलार्थः- अपुत्रस्य कश्चिदपि लोकः न भवति- एतस्मिन् विषये सर्वे पशवः जानन्ति। एतस्मात् कारणात् (पशुषु) पुत्रः स्वस्य जनन्या भगिन्या वा (पुत्रोत्पादनाय) मिलति।

व्याकरणम्-

- अस्ति- अस्-धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- अधिरोहति- अधि इत्युपसर्गपूर्वकात् रुह्-धातोः प्रथमपुरुषस्य एकवचने रूपम्।

एष पन्था उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः। तं पश्यन्ति पशवो, वयांसि च तस्मात्ते मात्राऽपि मिथुनी भवन्ति॥ इति हास्मा आख्याय॥

व्याख्या- पुत्रिण पुत्रवन्तो देवमनुष्यादयो विशोकाः शोकरहिताः सन्तो यं पन्थानं सुखानुभवरूपं मार्गमाक्रमन्ते प्राप्नुवन्त्येष पन्थाः पुत्रासुखानुभवरूपो मार्ग उरुगाय उरुभिर्महद्भिः शास्त्रज्ञैः राजामात्यादिभिश्च गीयते। तथा सुशेव सुष्ठु सेवितुं योग्यः सुखाधिक्यस्य विद्यमानत्वात्। तं पुत्रसुखानुभवरूपं पशवो गवादयो वयांसि पक्षिणः संपश्यन्ति जानन्ति। तस्मात्ते पशुपक्ष्यादयः पुत्रसुखार्थं मात्रा सह मिथुनीभवन्ति किं किमुतान्यया स्त्रिया सहेत्यर्थः।

इति (अनेन प्रकारेण) ह अस्मै (राज्ञे हरिश्चन्द्राय) आख्याय (अभिधाय) (स नारदः विरराम इति शेषः)।

सरलार्थः- पुत्रवन्तः जनाः विगतशोकाः भवन्तः यं मार्गं स्वीकुर्वन्ति स मार्ग एव बहुजनैः प्रशंसनीयः किञ्च सुष्ठुतया सेवनस्य योग्यः। पशवः पक्षिणः च एतस्मिन् विषये जानन्ति, अतः एव ते स्वस्य मात्रा मिलति। (नारदर्षिः) तं (हरिश्चन्द्रं) एतत् सर्वम् उक्तवान्।

व्याकरणम्-

- पश्यन्ति- दृश्-धातोः लट्-लकारस्य प्रथमपुरुषस्य बहवचने रूपम्।
- भवन्ति- भू-धातोः लट्-लकारस्य प्रथमपुरुषस्य बहवचने रूपम्।
- आक्रमते- आङ् इत्युपसर्गपूर्वकात् क्रमु-धातोः प्रथमपुरुषस्य एकवचने रूपम्।

पाठगतप्रश्नाः-१

१. हरिश्चन्द्रः कस्य पुत्रः।
२. हरिश्चन्द्रस्य पुत्रः आसीत् न वा।
३. हरिश्चन्द्रस्य कति पत्न्यः सन्ति।
४. हरिश्चन्द्रस्य कौ ऋषी स्तः।
५. तयोः ऋषयोः कं हरिश्चन्द्रः पृष्टवान्।
६. नारदः कतिभिः गाथाभिः प्रत्युत्तरितवान्।
७. पितुः निकटे कस्मिन् सर्वाधिकभोगः तिष्ठति।
८. किं प्राणतुल्यम्।
९. किं शरणम्।
१०. भूतिः आभूतिः इति शब्दद्वयस्य का वाच्या भवति।

द्वितीयखण्डः

१२.१.२) इदानीं मूलपाठम् अवगच्छाम -

अथैनमुवाच वरुणं राचानमुपधाव पुत्रो मे जायतां तेन त्वा यजा इति।

व्याख्या- पुत्रनिमित्तलाभप्रतिपादिका नारदोक्ता दश गाथा उगाहृत्य पुत्रजन्मोपायोपदेशपरं नारदवाक्यमवतारयति-

अथ पुत्रेच्छानिमित्तकथनानन्तरमेनं पुत्रार्थिनं हरिशचन्द्रं नारद उवाच। हे हरिशचन्द्र वरुणं राजानमुपधार प्रार्थयस्व। येन प्रकारेण निश्चयः सोऽभिधीयते। हे वरुण त्वत्प्रसादान्मे पुत्रो जायतां ततस्तेन पुत्रेण त्वां यजै त्वामुद्दिश्य यज्ञं करवाणीति।

सरलार्थः- अनन्तरं (नारदः) हरिश्चन्द्रम् उक्तवान्- भवान् राज्ञः वरुणस्य निकटे प्रार्थयतु यत् मम पुत्रः जायताम्। तेन(पुत्रेण) अहं त्वाम् उद्दिश्य यागं करिष्यामि।

व्याकरणम्-

- उवाच – वच्-धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जायताम्- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लोट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति तथेति तस्य पुत्रो जज्ञे रोहितो नाम इति।

व्याख्या- नारदोपदेशमङ्गीकृत्य हरिशचन्द्रो। वरुणमुपसारे प्रार्थयामास। स वरुणोऽपि तथाऽस्त्विति तदीयपुत्रोत्पत्त्यै वरं दत्तवान्। तेन च वरोणत्पन्नस्य रोहित इत्येतन्नामाभूत्।

सरलार्थः- तथैव करिष्यामि। (एवम् उक्त्वा) हरिश्चन्द्रः राज्ञः वरुणस्य समीपम् अप्रार्थयत् मम पुत्रः जायताम्, तं प्रदाय तव यागं करिष्यामि। (वरुणः उवाच) तथैव भवतु। अनन्तरं तस्य रोहितनामकः एकः पुत्रः अजायत।

व्याकरणम्-

- जायताम्- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लोट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जज्ञे- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशो न्वस्त्वथ त्वा यजा इति तथेति इति।

व्याख्या- अथ बहुभिः पर्यायैवरुणस्योक्तिर्हरिशतन्द्रस्य प्रत्युक्तिश्चेत्युभयं प्रतिपाद्यते। तत्र प्रथमं पर्यायं दर्शयति-

तं हरिशचन्द्र वरुणं उवाच। हे हरिशचन्द्र ते पुत्रोऽजनि वा उत्पन्न एवानेन पुत्रेण मामुद्दिश्य यागं कुर्विति। एवं वरुणेनोक्ते हरिशचन्द्रः पुनः प्रत्युवाच। यागार्थः पशुर्यदा निर्दशो भवति तदा स पशुर्मेध्यो यागयाग्यो भवति। निर्गतान्यशौचदिनानि दशसंख्याकानि यस्मात् पशोः सोऽयं निर्दशः। तस्मादयं नु क्षिप्रं निर्देशोऽस्तु। अथानन्तरं त्वा प्रत्यहं यजा इत्यतद्वाक्यं वरुणस्तथाऽस्त्वित्यङ्गीचकार।

सरलार्थः- (अनन्तरं) वरुणः तम् (हरिश्चन्द्रं) अवदत्- तव पुत्रः अजायत, तेन माम् उद्दिश्य यागं कुरु। हरिश्चन्द्रः उक्तवान्- (जन्मनः परं) दशदिनेषु अतिक्रान्तेषु एव पशुमेध्ययागः भवति। अतः शीघ्रं दश दिनानि गच्छन्तु ततः त्वाम् उद्दिश्य यागं करिष्यामि। (वरुणः उक्तवान्) तथैवास्तु।

व्याकरणम्-

- उवाच- वच- धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- भवति- भू(सत्तायाम्) इत्यर्थकात् धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

स ह निर्दश आस तं होवाच निर्दशो न्वभूद्यजस्व माऽनेनेति स होवाच यदा वै पशोर्दन्ता जायन्तेऽथ स मेध्यो भवति दन्ता न्वस्य जायन्तामथ त्वा यजा इति तथेति इति।

व्याख्या- दशदिनाशौचापगमे शुद्धत्वाद्यथा यागयोग्यत्वं तथा दन्तोत्पन्नत्वादयवसंपूर्त्या यागयोग्यत्वमित्यभिप्रायः। स्पष्टमन्यत्।

सरलार्थः- तस्य(रोहितस्य) दशदिनानि गतानि, (तदा वरुणः) हरिश्चन्द्रम् उक्तवान्- दश दिनानि गतानि, अधुना त्वम् अनेन यागं कुरु। हरिश्चन्द्रः उवाच- यदा पशुदन्तः भवति, तदा स मेध्यः भवति। अस्य दन्तः भवतु। ततः वयं यागं करिष्यामः। (वरुणः उक्तवान्) तथैवास्तु।

व्याकरणम्-

- जायन्ते- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- भवति- भू(सत्तायाम्) इत्यर्थकात् धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जायन्ताम्- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लोट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- उवाच- वच- धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

तस्य ह दन्ता जज्ञिरे तं होवाचाज्ञत वा अस्य दन्ता यजस्व माऽनेनेति स होवाच या वै पशोर्दन्ताः पद्यन्तेऽथ स मेध्यो भवति दन्ता न्वस्य पद्यन्तामथ त्वा यजा इति तथेति।

व्याख्या-अज्ञत वै जाता एव। पद्यन्ते पतन्ति। प्रथमोत्पान्नानां दन्तानमस्थायित्वेन मुख्यपशववयवत्वाभावात्तात्पाते सति पशोर्मेध्यत्वम्।

सरलार्थः- ततः तस्य दन्ताः अजायन्त। (वरुणः) हरिश्चन्द्रम् अवदत् अस्य दन्ताः सञ्जाताः, अधुना मम अनेन यागं कुरु। हरिश्चन्द्रः उक्तवान्- यदा पशुदन्ताः पतन्ति तदा स मेध्यः भवति, अस्य दन्ताः पतन्तु तदा त्वाम् उद्दिश्य यागं करिष्यामः। (वरुणः उक्तवान्) तथैवास्तु।

व्याकरणम्-

- उवाच- वच- धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जज्ञिरे- जनी इति धातोः लिट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- पद्यन्ते - पद-गतौ इति धातोः लट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- पद्यन्ताम्- पद-गतौ इति धातोः लोट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।

तस्य ह दन्ता पेदिरे तं होवाचापत्सत वा अस्य दन्ता यजस्व माऽनेनेति स होवाच यदा वै पशोर्दन्ताः पुनर्जायन्ते
अथ न मेध्यो भवति दन्ता न्वस्य पुनर्जायन्तामथ त्वा यजा इति तथेति।

व्याख्या-अपत्सत वै पतिताः। पुनरुत्पन्नानां दन्तानां स्थिरत्वेन संपूर्णावयवत्वात् पशोर्मेध्यत्वम्।

सरलार्थः- तस्य (रोहितस्य) दन्ताः पतितवन्तः। (वरुणः) हरिश्चन्द्रम् उवाच- अस्य दन्ताः पतिताः, अधुना एभिः मम यागं कुरु। हरिश्चन्द्रः उक्तवान्- यदा पशुदन्ताः पुनः जायन्ते तदा स मेध्यः भवति। अतः अस्य दन्ताः पुनः जायन्तां ततः तव यागं करिष्यामः। (वरुणः उक्तवान्) तथैवास्तु।

व्याकरणम्-

- जायन्ताम् -जनी प्रादुर्भावे इति धातोः लोट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- भवति- भू(सत्तायाम्) इत्यर्थकात् धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जायन्ताम्- जनी(प्रादुर्भावे) इत्यर्थकात् धातोः लोट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।

तस्य ह दन्ताः पुनर्जज्ञिरे तं होवाचाज्ञत वा अस्य पुनर्दन्ता यजस्व माऽनेनेति स होवाच यदा वै क्षत्रियः सांनाहुको भवत्यथ मेध्यो भवति संनाहं नु प्राप्नोत्वथ त्वा यजा इति तथेति।

व्याख्या-अज्ञात वै जाता एव। पश्वन्तरस्य पुनर्दन्तोत्पत्तिक्रमेण मेध्यत्वेऽप्यस्य पशोः क्षत्रियत्वात् स्वजात्युचितधनुर्वाणकवचादिसिंहनाहशीलित्वे सति जात्युचितव्यापारसंपूर्तौ मेधात्वम्। तस्मान्नु क्षिप्रमेवासौ संनाहं प्राप्तोत्वन्तरमेव यजा इत्युत्तरं वरुणोऽङ्गीचकार।

सरलार्थः- तस्य (रोहितस्य) दन्ताः पुनः उत्पन्नाः, तम् (हरिश्चन्द्रं) उक्तवान्- अस्य दन्ताः पुनः उत्पन्नाः। अधुना एभिः मम यागं कुरु। हरिश्चन्द्रः उक्तवान्- क्षत्रियः यदा सन्नाहुकः भवति तदा स मेध्यः भवति। मम पुत्रः सन्नाहुकः भवतु तदा तव यागं करिष्यामः। (वरुणः उक्तवान्) तथैवास्तु।

व्याकरणम्-

- उवाच- वच- धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- जज्ञिरे- जनी इति धातोः लिट्-लकारस्य प्रथमपुरुषस्य बहुवचने रूपम्।
- प्राप्नोति- प्र इत्युपसर्गकात् आप्-धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

स ह संनाहं प्रापत्तं होवाच संनाहं नु प्राप्नोद्यजस्व माऽनेनेति स तथेत्युक्त्वा पुत्रमामन्त्रयामास ततायं वै मह्यं त्वामददाद्धन्त त्वयाऽहमिमं यजा इति।

व्याख्या- संनाहप्राप्तोरुर्द्धं स हरिशचन्द्रो वरुणोक्तिमङ्गीकृत्य पुत्रमामन्त्र्यैवमुवाच। उपलालनार्थं पुत्रे पिततृवाचितशब्दप्रयोगः। हे तात हे पुत्राय एव वरुणो मह्यं त्वां पुत्रवरेण दत्तवान्। हन्त दुष्टोऽहमिमं वरुणं यत्त्वया पुत्रेण यजै यागरूपां करवाणीति हरिशचन्द्रस्योक्तिः।

सरलार्थः- ततः स बालकः सन्नाहुकः अभवत्। (वरुणः) हरिश्चन्द्रम् उवाच- अयं सन्नाहुकः जातः। अतः अनेन मम यागं कुरु। (राजा) हरिश्चन्द्रः तथैव भवतु इत्युक्त्वा पुत्रम् आहूय अवदत् - वत्स अयं वरुणदेवः त्वां मह्यं प्रदत्तवान्। अहो (अधुना) त्वया वरुणम् उद्दिश्य यागः कर्तव्यः।

व्याकरणम्-

- उवाच- वच- धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- प्राप्नोति- प्र इत्युपसर्गकात् आप्-धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- यजस्व – यज इत्यर्थकात् लोट्-लकारस्य मध्यमपुरुषस्य एकवचने रूपम्।

स ह नेत्युक्त्वा धनुरायारण्यमुपातस्थौ स संवत्सरमरण्ये चचार।

व्याख्या-स ह स खलु रोहिताख्यः पुत्रः पितृवाक्यं निषिध्य स्वरक्षणार्थं धनुः स्वीकृत्याहरणं प्रत्युपगतोऽभूत्। कस्मिंश्चिदरण्यो नैरन्तर्येन स रोहितः संवत्सरं चचारेति।

सरलार्थः- तत् नैव भवतु इत्युक्त्वा स रोहितः धनुः आदाय अरण्यं गतवान्। किञ्च एकवत्सरं यावत् स अरण्ये विचरन् आसीत्।

व्याकरणम्-

- चचार – चर-धातोः लिट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।
- उक्त्वा - वद्- धातोः क्त्वाप्रत्ययान्तं रूपम्।

पाठगतप्रश्नाः-२

११. अस्मिन् पाठे कस्य कथा वर्णिता।

१२. हरिश्चन्द्रः राज्ञः वरुणस्य समीपम् किम् अप्रार्थयत्।

१३. हरिश्चन्द्रः कम् उद्दिश्य यागं कृतवान्।

१४. पशुमेध्ययागः कदा अनुष्ठीयते।

१५. कीदृशो पशुः पशुमेध्ययागयोग्यो भवति।

१६. हरिश्चन्द्रः कम् उक्तवान् यत् अस्य दन्ताः सञ्जाताः।

१७. कः धनुः आदाय अरण्यं गतवान्।

१८. सन्नाहुकः इत्यस्य कः अर्थः।

१९. हरिश्चन्द्रः स्वस्य गृहस्थं नारदर्षिं किम् पृष्टवान्।

२०. सः कथं प्रत्युत्तरितवान्।

पाठसारः

अस्मिन् पाठे एकम् उपाख्यानम् अस्ति। एवमेव शुनःशेपोपाख्याने हरिश्चन्द्रस्य कथा वर्णिता। तत्र हरिश्चन्द्रस्य यद्यपि शतं पत्न्यः आसन् तथापि तस्य कश्चदपि पुत्रः नासीत्। तस्मात् स स्वस्य गृहस्थं नारदर्षिं पृष्टवान्। स दशभिः गाथाभिः प्रत्युत्तरितवान्। स विविधप्रकारेण पुत्रस्य माहात्म्यम् अवदत्। यथा पुत्रः सर्वाधिकभाग्यविषयः पितुः निकटे इत्यादिप्रकारेण। तत् सर्वमेव मन्त्रेषु स्पष्टमेव।

पाठान्तप्रश्नाः

१. शुनःशेपोपाख्यानम् इत्यस्य सारं लिखत।

२. हरिश्चन्द्रो ह वैधस... इति शुनःशेपोपाख्यानांशं सायणभाष्यानुसारि व्याख्यानं कुरु।

३. अन्नं ह प्राणः... इति शुनःशेपोपाख्यानांशं सायणभाष्यानुसारि व्याख्यानं कुरु।

४. पतिर्जायां प्रविशति... इति शुनःशेपोपाख्यानांशं सायणभाष्यानुसारि व्याख्यानं कुरु।

५. नापुत्रस्य... इति शुनःशेपोपाख्यानांशं सायणभाष्यानुसारि व्याख्यानं कुरु।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरकूटः-१

१. वेधसः।

२. आम्।

३. शतम्।

४. पर्वतनारदौ।

५. नारदम्।

६. दशभिः।

७. पुत्रे।

८. अन्नम्।

९. वस्त्रम्।

१०. पत्नी।

उत्तरकूटः-२

११. हरिश्चन्द्रस्य।

१२. मम पुत्रः जायताम्।

१३. वरुणम्।

१४. जन्मनः परं दशदिनेषु अतिक्रान्तेषु।

१५. यागार्थः पशुर्यदा निर्देशो भवति तदा स पशुर्मेध्यो यागयाग्यो भवति।

१६. वरुणम्।

१७. रोहितः।

१८. कवचपरिधानस्य योग्यः पुरुषः।

१९. शतं पत्न्यः सत्यपि तस्य कश्चदपि पुत्रः किमर्थं नासीत् इति।

२०. दशभिः।

॥ इति द्वादशः पाठः ॥